दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् अधिकज्येष्ठकृष्णनवमी
ज्येष्ठ 26 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-227 | 1 | जून 09, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com



2 मण्डीनगरस्य 500 वर्षाणाम् ऐतिहासिकयात्रायाः अध्ययनाय मंडीं प्राप्तवान् जीवाजीविश्वविद्यालयः ग्वालियर इत्यस्य दलम्

3 परिवादनिवारणे न भविष्यति विलम्बः, दोषाधिकारिणां विरुद्धं त्वरितकार्याचरणं भविष्यति : नीतीशमिश्रः

5 ललितनारायणमिथिलाविश्वविद्यालयस्य ललितकला-सङ्कायान्तर्गतकथा रङ्गमञ्चश्च' इति विषयक-पञ्चदिवसीय-नाट्यकार्यशालायाः शुभारम्भः


## केन्द्रसर्वकारेण विविधेषु विषयेषु चर्चयितुं सर्वदलीयसंगोष्ठी आहूता




गतदिने अपराह्ने नवदेहली-नगरे भारत-सभा अभवत्। अस्याम् सभायां विपक्षस्य विभिन्नाः नेतारः उपस्थिताः आसन्। अस्मिन् काङ्ग्रेस-पक्षस्य अध्यक्षः मल्लिकार्जुन खरगे, काङ्ग्रेस-पार्टी वरिष्ठः नेता राहुल गान्धी, समाजवादीपार्टीदलस्य प्रमुखः अखिलेशः यादवः, तृणमूल-काङ्ग्रेस-पार्टी अध्यक्षा ममता बनर्जी, वरिष्ठः नेशनल कॉन्फ्रेन्स-नेता उमर अब्दुल्ला, एन. सी.पी. एस.पी. नेता सुप्रिया सुले च आसन्। सभायाः अनन्तरं प्रसारमाध्यमान् सम्बोधयन् काङ्ग्रेस-दलस्य अध्यक्षः मल्लिकार्जुनखरगे उक्तवान् यत् सभायां पञ्चविंशतिः राजनैतिकदलानि उपस्थितानि आसन्। सः अवोचत् यत् सभायां विभिन्नेषु विषयेषु चर्चा कृता, सर्वे अपि स्वमतं व्यक्तवन्तः इति।

## भारतेन पश्चिम-एशियाक्षेत्रे पुनः प्रवृत्तानाम् आक्रमणानां विषये गम्भीरा चिन्ता व्यक्ता

भारतदेशः पश्चिम-एशियाक्षेत्रे पुनः प्रवृत्तानाम् आक्रमणानां विषये गम्भीरां चिन्तां व्यक्तवान्। विदेशमन्त्रालयेन उक्तं यत् एते घटनाक्रमाः अन्ताराष्ट्रीयसमुदायस्य कृते अत्यन्तं चिन्ताजनकाः सन्ति। भारतेन सर्वेभ्यः पक्षेभ्यः शीघ्रं तनाव-न्यूनीकरणस्य तथा नागरिकाणाम् सुरक्षायाः आग्रहः कृतः।

## देशे गृह-ईंधनस्य-एलपीजी-गैस-इत्यस्य तथा प्राकृतिक ईंधनस्य आपूर्तिः स्थिरा

शिलातेल-प्राकृतिक-ईंधन-पेट्रोलियम-प्राकृतिकगैस-मन्त्रालयेन उक्तं यत् पश्चिम-एशियायां वर्तमानपरिस्थितेः अपि देशे शिलारसतैलस्य, गृह-ईंधनस्य-एलपीजी-गैस-इत्यस्य तथा प्राकृतिक ईंधनस्य आपूर्तिः स्थिरा वर्तते। मन्त्रालयस्य अनुसारेण पेट्रोल-डीजल-एलपीजी इत्यादीनां पर्याप्तः भण्डारः देशे उपलब्धः।

## अन्त्योदयस्य भावनया प्रेरितानां निर्धनजनानां कल्याणम् एव गतद्वादशवर्षेषु शासनस्य नीतिनिर्माणस्य आधारः-प्रधानमन्त्री



प्रधानमन्त्री नरेन्द्र मोदी गतदिने अवदत् यत् अन्त्योदयस्य भावनया प्रेरितानां दरिद्रजनानां कल्याणम् एव गतद्वादशवर्षेषु शासनस्य नीतिनिर्माणस्य आधारः अभवत्। तेन उक्तं यत् अस्मिन् काले भारतदेशः बहूनि परिवर्तनानि अनुभूतवत्, येषां केन्द्रे निर्धनाः, वञ्चिताश्च जनाः आसन्। प्रधानमन्त्री अवदत् यत् जनधन योजना, प्रत्यक्ष लाभ-हस्तान्तरणम्, स्वच्छ-भारत-अभियानम्, पीएम-आवास योजना, जल-जीवन-मिशन इति तथा आयुष्मान-भारत-योजना इत्यादीनां मुख्योद्देश्यं जनानां कृते गौरवपूर्ण जीवनम् अवसराणां सुनिश्चितं कर्तुं आसीत्। निर्धनजनानां जीवनस्तरस्य उन्नयने प्रौद्योगिक्याः अपि महत्त्वपूर्णा भूमिका अभवत्।

## पश्चिमबङ्गालराज्ये आयुष्मान प्रधानमन्त्रि-भारत-जन-आरोग्य-योजना प्रवर्तिष्यते। एतेन सह एषा योजना सम्पूर्ण देशे कार्यान्विता भविष्यति



**हिमसंस्कृतवार्ता।** गतदिने आरभ्य पश्चिमबङ्गालराज्ये आयुष्मान प्रधानमन्त्रि-भारत-जन-आरोग्य-योजना प्रवर्तिष्यते। एतेन सा योजना सम्पूर्ण देशे कार्यान्विता भविष्यति। स्वास्थ्यसेवा-विस्तारदिशि महत्त्वपूर्ण पदम् इदम्। राज्यसर्वकारः गतदिने आयुष्मान् भारत-प्रधानमन्त्री जनआरोग्य-योजनायाः कार्यान्वयनार्थं राष्ट्रिय-स्वास्थ्य-प्राधिकरणेन सह दिल्ली-नगरे संधिपत्रे हस्ताक्षरं करिष्यति। अस्मिन् अवसरे केन्द्रीयस्वास्थ्यमन्त्री जे. पी. नड्डा तथा पश्चिमबङ्गालस्य मुख्यमन्त्री सुवेन्दु अधिकारी उपस्थितौ भविष्यतः। योजनायाः अन्तर्गतं पात्रपरिजनेभ्यः प्रतिवर्षं पञ्चलक्षरूप्यकपर्यन्तं स्वास्थ्य-बीमा-सुरक्षा प्रदास्यते।

## दिल्ली-उच्चन्यायालयेन सी.बी.एस.ई.-बोर्ड-इत्यस्य द्वादश-कक्षायाः उत्तरपुस्तिकानां आंकिक मूल्याङ्कन-प्रणाली-विषये अनियमितता सन्दर्भ केन्द्र-सर्वकाराय तथा सी.बी.एस.ई. बोर्ड-इत्यस्मै सूचना-पत्रं प्रदतम्




द्वादश-कक्षायाः दिल्ली-उच्चन्यायालयेन केन्द्रीय माध्यमिक-शिक्षा-बोर्ड-इत्यस्य उत्तरपुस्तिकानां आंकिक मूल्याङ्कन-प्रणालीविषये जनहित याचिकायां केन्द्र-सर्वकाराय तथा सी.बी.एस.ई.-बोर्ड-इत्यस्मै सूचना-पत्रं निर्गतम्। न्यायमूर्तिद्वयं नीना-बंसल-कृष्णा तथा मधु-जैन-महोदयाभ्यां राष्ट्रीय-भारतीय-विद्यार्थी-संघस्य याचिकायाः आधारेण केन्द्र-सर्वकारात् सी.बी.एस.ई. बोर्ड इत्यस्मात् च उत्तरं याचितम्। याचिकायां आंकिक-मूल्याङ्कन-प्रणाल्याः निष्पक्षता, पारदर्शिता तथा विश्वसनीयता एषु विषयेषु प्रश्नाः उत्थापिताः। अस्य प्रकरणस्य आगामि श्रवणं जूनमासस्य द्वादश-दिनांके भविष्यति।

## ईरानयात्रां परिहर्तुं भारतीयदूतावासेन परामर्शः प्रदत्तः

ईरानदेशे भारतीयदूतावासस्य परामर्शः ईरानस्थितेन भारतीयदूतावासेन क्षेत्रे वर्तमानतनावपूर्णपरिस्थितेः कारणात् भारतीयनागरिकेभ्यः ईरानयात्रां परिहर्तुं परामर्शः प्रदत्तः। तत्र वर्तमानाः भारतीयनागरिकाः उपलब्धयानसाधनैः देशत्यागं कर्तुमपि सूचिताः।

## सुभाषितम्

**धनानि जीवितं चैव, परार्थे प्राज्ञ उत्सृजेत्।**
**सन्निमित्ते वरं त्यागो, विनाशे नियते सति॥**

अर्थात्- बुद्धिमान् मनुष्य को पर उपकार के लिए अपना धन और प्राणों को भी त्याग देना चाहिए, क्योंकि विनाश तो अवश्य होगा, इसलिए परोपकार के लिए त्याग करना श्रेष्ठ है।


हिमसंस्कृतवार्ता:
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263



सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य समुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सङ्केत- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्


## पर्यावरण-राज्यमन्त्री महासागर-संरक्षणस्य समुद्रीजीव-रक्षणस्य च संकल्पं कर्तुम् आह्वयत्




विश्व-महासागर-दिवसस्य अवसरे पर्यावरण-राज्यमन्त्री कीर्तिवर्धन-सिंहः जनान् महासागर-संरक्षणस्य समुद्रीजीव-रक्षणस्य च संकल्पं कर्तुम् आह्वयत्। सः अवदत् यत् महासागराः विश्वस्य राष्ट्राणि, परम्पराः च परस्परं संयोजयन्ति। भाविपरम्पराणां कृते स्वच्छजलस्य स्वस्थपर्यावरणस्य च संरक्षणार्थं सर्वैः सहकार्यं करणीयम् इति तेन उक्तम्।

# मण्डीनगरस्य 500 वर्षाणाम् ऐतिहासिकयात्रायाः अध्ययनाय मंडीं प्राप्तवान् जीवाजीविश्वविद्यालयः ग्वालियर इत्यस्य दलम्



हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा। मण्डीनगरस्य 500 वर्षाणाम् ऐतिहासिकयात्रायाः उपलक्ष्ये सरदारपटेलविश्वविद्यालयः, मण्डी- जीवाजी विश्वविद्यालयः, ग्वालियर इत्येतयोः मध्ये जातस्य सहमतिज्ञापनस्य अंतर्गतं संकाय-विद्यार्थीशैक्षणिक- आदानप्रदाने पुरातात्त्विक-ऐतिहासिकसर्वेक्षणकार्यक्रमस्य शुभारम्भः जातः। अस्मिन् अवसरे जीवाजी विश्वविद्यालयस्य, ग्वालियरस्य पञ्चसदस्यीयदलमेकं वरिष्ठ-इतिहासविदः पुरावेत्तुश्च प्रो. शांतिदेव सिसोदियावर्यस्य नेतृत्वे मण्डीं प्राप्तवान्। कार्यक्रमे सरदारपटेलविश्वविद्यालयस्य, मण्डी इत्यस्य कुलपतिः आचार्यः ललितकुमार अवस्थीवर्यः दलस्य स्वागतं कृत्वा अवदत् यत् शैक्षणिकसहयोगः भारतीय- इतिहासस्य, सांस्कृतिकधरोहराणाञ्च संरक्षणे महत्वपूर्णः बिन्दुरस्ति। तेनोक्तं यत् मण्डीनगरं हिमालयी सभ्यतायाः, संस्कृतेः, इतिहासस्य च एकं महत्वपूर्णकेन्द्रमस्ति। अस्य 500 वर्षाणाम् इतिहासस्य वैज्ञानिकम् अध्ययनं प्रलेखनं च भावी संततीनाङ्कृते अत्यंतोपयोगी भविष्यति। सः विश्वासं प्रकटितवान् यत् एतत् सर्वेक्षणं क्षेत्रीयइतिहासस्य राष्ट्रिय-इतिहासस्य व्यापकधारया सह सङ्गमने सहायकं भविष्यति। सः इतिहासविभागस्य, कार्यक्रमसंयोजकस्य डॉ. राकेशकुमारशर्मावर्यस्य च श्लाघां कुर्वन् अवदत् यत् एतादृशाः संयुक्ताः शोधकार्यक्रमाः अकादमिक- सहयोगाय नूतनां दिशं प्रदास्यन्ति, मण्डीनगरस्य ऐतिहासिक- सांस्कृतिक-विरासतस्य संरक्षणे संवर्धने च महत्त्वपूर्णं योगदानं दास्यन्ति। कार्यक्रमस्य संयोजकः इतिहासविभाध्यक्षः च डॉ. राकेशकुमारशर्मा आगन्तुकदलस्य स्वागतं कुर्वन् सर्वेक्षणकार्यक्रमस्य रूपरेखाम् उपस्थापितवान्। सः सूचितवान् यत् एषः अभ्यासः मण्डीनगरस्य ऐतिहासिक- सांस्कृतिक- स्थापत्य- विरासतस्य प्रलेखनस्य दिशि एकः महत्त्वपूर्णः उपक्रमः वर्तते। सः मण्डीनगरस्य ऐतिहासिकमहत्त्वं विविच्य अवदत् यत् सर्वेक्षणदलं जनपदस्य अन्यान् प्रमुखान् पुरास्थलानि अपि अधीत्य स्वकीयान् निष्कर्षान् संयुक्त-शोध-परियोजनायाः माध्यमेन प्रस्तौष्यति। प्रो. शान्तिदेवसिसोदिया उक्तवान् यत् मण्डीनगरस्य ऐतिहासिकधरोहराः पश्चिमी- हिमालयस्य सांस्कृतिक-निरन्तरतां बोद्धुम् अतीव महत्त्वपूर्णाः सन्ति। सः अवदत् यत् सर्वेक्षणेण संप्राप्तानां तथ्यानाम् उपयोगः भविष्ये शोधकार्ये, प्रकाशने, विरासत-संरक्षणस्य योजनासु च विधास्यते।सर्वेक्षणदलेन मण्डीनगरस्य प्रमुखाणाम् ऐतिहासिक-पुरातात्त्विक- स्थलानां निरीक्षणं कृतम्। एतेषु त्रिलोकनाथमन्दिरं, पञ्चवक्त्र- महादेवमन्दिरं, भूतनाथमन्दिरं, अर्धनारीश्वरमन्दिरं, नीलकण्ठ-महादेवमन्दिरं, महामृत्युञ्जयमन्दिरं, राजमहलपरिसरः, नगरस्य प्राचीनाः जल-स्रोताः पारम्परिक-जल-प्रबन्धन-संरचनाः च विशेषरूपेण अधीताः। दलेन एतेषां स्थलानां स्थापत्यशैली, मूर्तिकला, अभिलेखीयमहत्त्वं सांस्कृतिकपरम्पराश्च अधिकृत्य सूचनाः सङ्गृहीताः। अस्मिन् अवसरे इतिहासविभागस्य सहायक-आचार्यः डॉ. रामपालः, विकेशकुमारः, राजेशशर्मा, शोधार्थी वेदः, राहुलः, राजू, डोलमा, सूर्यप्रकाशः, सुरेखा, जीवाजी-विश्वविद्यालयस्य शोधार्थी राहुल बरैया, सुमन प्रिया अन्याः छात्राश्च उपस्थिताः आसन्।

# भानुपल्ली-बैरी रेलमार्गस्य कृते प्रदेशसर्वकारस्य द्विसहस्रकोटिरूप्यकाणां देयता अवशिष्टा- अनुरागः

हिमसंस्कृतवार्ताः- हमीरपुरम्।पूर्वकेन्द्रीयमन्त्री, हमीरपुरसंसदीयक्षेत्रस्य च सांसदः अनुरागसिंहठाकुरः अवदत् यत् भानुपल्ली-बैरी रेलमार्गपरियोजनायां प्रदेशसर्वकारेण भूमि- अधिग्रहणे विलम्बः क्रियते। सः आरोपम् अकरोत् यत् अस्यां परियोजनायां राज्यसर्वकारस्य प्रायः २००० कोटिरूप्यकाणां (द्विसहस्रकोटिरूप्यकाणां) देयता लम्बितेति, येन कार्यं प्रभावितं भवति। हमीरपुरे पत्रकारगोष्ठ्याः समये सः अवदत् यत् सामरिकदृष्ट्या महत्त्वपूर्णः अयं रेलमार्गः प्रथमे चरणे २०२७ तमे वर्षे यावत् बैरी पर्यन्तं पूर्णः भवितव्यः आसीत्, परन्तु भूमि-अधिग्रहणे विलम्बस्य कारणात् परियोजना अग्रे वर्धितुं न शक्नोति। सांसदः प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे केन्द्रसर्वकारस्य द्वादशवर्षाणि (१२ वर्षाणि) जनसेवा, पारदर्शी-प्रशासनं, समावेशी- विकासस्य च उदाहरणं इति वर्णितवान्। सः अवदत् यत् प्रधानमन्त्री आवासयोजना, आयुष्मान् भारतम्, उज्ज्वलायोजना, स्वच्छभारतअभियानम्, सौभाग्ययोजना, जनधनयोजना च इत्यादयः कल्याणकारिण्यः योजनाः निर्धनपरिवाराणां जीवने सकारात्मकं परिवर्तनम् आनितवत्यः। सः एतदपि दावं कृतवान् यत् गतेषु वर्षेषु महती संख्यायां जनाः दारिद्र्यात् बहिः आगताः। सांसदः न्यवेदयत् यत् हिमाचलप्रदेशे प्रायः १७ सहस्रकोटिरूप्यकाणां रेलपरियोजनासु कार्यं प्रचलति। सः अवदत् यत् सम्प्रति कोलकातानगरस्य हिमाचलस्य च मध्ये 'गुरुमुखी-एक्स्प्रेस' रेलसेवा आरब्धा, येन क्षेत्रीयसम्पर्कः आर्थिकगतिविधयः च प्रवर्धिष्यन्ते।

# हिमाचलप्रदेशस्य सर्वेषु पदवीमहाविद्यालयेषु इदानीं 'सेमेस्टर' प्रणाली प्रवर्तिता, सर्वकारेण अधिसूचना प्रसारिता

हिमसंस्कृतवार्ताः- शिमला।हिमाचलप्रदेशसर्वकारेण राज्यस्य उच्चशिक्षासंस्थासु राष्ट्रियशिक्षानीतेः (एनईपी- २०२०) बृहत् परिवर्तनं प्रवर्तुम् औपचारिकी अधिसूचना प्रसारिता। शिक्षाविभागस्य अधिसूचनानुसारं शैक्षणिकसत्रात् २०२६-२७ तः प्रदेशस्य सर्वेषु पदवीमहाविद्यालयेषु स्नातकस्तरे 'सेमेस्टर' (षाण्मासिकी) प्रणाली प्रवर्तिष्यते। एतेन सह एव सर्वेषु महाविद्यालयेषु 'मल्टीपल एन्ट्री एण्ड एग्जिट' (बहुविधप्रवेश-निकास) योजना अपि आरप्स्यते। शिक्षासचिवस्य राकेशकंवरस्य पक्षतः प्रसारितायाम् अधिसूचनायां कथितं यत् राज्यपालेन प्रदेशस्य सर्वेषु पदवीमहाविद्यालयेषु स्नातकस्तरे सेमेस्टरप्रणाल्याः स्वीकाराय स्वीकृतिः दत्ता। सर्वकारेण स्पष्टीकृतं यत् मल्टीपल एन्ट्री एण्ड एग्जिट व्यवस्था अपि सर्वेषु पदवीमहाविद्यालयेषु प्रवर्तिष्यते। अस्याः व्यवस्थायाः अन्तर्गतं छात्राः शिक्षायाः विभिन्नचरणान् पूर्णं कृत्वा निर्धारितयोग्यतानुसारं प्रमाणपत्रं, डिप्लोमा अथवा पदवीं (उपाधिं) प्राप्तुं शक्ष्यन्ति, आवश्यकतायां सत्यां पश्चात् पुनः प्रवेशं गृहीत्वा स्वपठनं निरन्तरं कर्तुं शक्ष्यन्ति। चतुर्वर्षीयः स्नातकपदवीपाठ्यक्रमः प्रारम्भिकचरणे केवलं चयनितेषु सर्वकारीयपदवीमहाविद्यालयेषु एव चयनम् करिष्यते। एतेषां महाविद्यालयानां सूची पृथक्तया अधिसूचिता भविष्यति। उच्चशिक्षासञ्चालनालयेन अपि सर्वकारस्य अधिसूचना सर्वेषां सर्वकारीयपदवी- संस्कृत- महाविद्यालयानां प्राचार्यान् प्रति प्रेषिता। साथ एव आवश्यककार्याचरणाय अधिसूचनां च विभागीयजालपुटे आरोपयितुं निर्देशाः दत्ताः। राज्यमन्त्रिमण्डलेन २३ मार्च दिनाङ्के आयोजितायां गोष्ठ्याम् अस्य प्रस्तावस्य अनुमोदनं कृतम् आसीत्। इदानीम् औपचारिक अधिसूचनायाः प्रसारणेन सह एव प्रदेशस्य महाविद्यालयेषु एनईपी- आधारिता नवीना स्नातकशिक्षाव्यवस्था प्रवर्तिता भवितुं मार्गः प्रशस्तः जातः।प्रदेशविश्वविद्यालयस्य पत्राचारशिक्षासञ्चालनालयेन (सीडीओई) बीए, बीकॉम पाठ्यक्रमस्य छात्रेभ्यः प्रवेशशुल्कं प्रदातुम् अतिरिक्तसमयः दत्तः। बीए, बीकॉम प्रथमवर्षस्य जनवरी-समूहः २०२५-२६, द्वितीयवर्षस्य जनवरी-समूहः २०२४-२५, तृतीयवर्षस्य जनवरी-समूहः २०२३-२४ इत्यस्य छात्रेभ्यः विना, जनवरी-समूहः २०२१-२२ एवं २०२२-२३ इत्यस्य छात्राः अपि अस्याः सुविधायाः लाभं प्राप्तुं शक्ष्यन्ति। विना विलम्बशुल्केन प्रवेशशुल्कदानस्य अन्तिमतिथिः २७ मई आसीत्। अतः परम् इदानीं छात्राः ११ जून पर्यन्तं ५०० रूप्यकाणां विलम्बशुल्केन सह अन्तर्जालमाध्यमेन शुल्कं दातुं शक्नुवन्ति। २६ जून पर्यन्तं १००० रूप्यकाणां विलम्बशुल्केन सह प्रवेशशुल्कदानस्य अवसरः दत्तः अस्ति। एतदतिरिक्तं कुलपतेः अनुमत्या परीक्षायाः आरम्भात् १५ दिनानि पूर्वं यावत् १५०० रूप्यकाणां विलम्बशुल्केनापि प्रवेशशुल्कं दातुं शक्यते। एषः नियमः तेषां छात्राणां कृते राहतं (साहाय्यं) आनितवान् ये निर्धारितसमये शुल्कं दातुं न शक्नुवन्ति स्म। सीडीओई-निदेशकः प्रदीपकुमारः सम्बद्धान् छात्रान् निर्धारितकालावधौ एव अन्तर्जालमाध्यमेन प्रवेशशुल्कं दातुम्, अन्तिमतिथिं यावत् प्रतीक्षां न कर्तुं अपीलं कृतवान्, येन परीक्षा-प्रवेशसम्बन्धिषु औपचारिकतासु काऽपि समस्या न भवेत्।

# बीटेक प्रवेशपरीक्षा १२ जून दिनाङ्के, १४०० अभ्यर्थिनः सम्मिलिताः भविष्यन्ति

एचपीयू इत्यस्य यूनिवर्सिटी इन्स्टीट्यूट ऑफ टेक्नोलॉजी (यूआईटी) इत्यस्मिन् बीटेक- पाठ्यक्रमस्य प्रवेशाय सामान्यप्रवेशपरीक्षा (सीईटी) १२ जून दिनाङ्के अपराह्णे द्विवादने (२:००) भविष्यति। परीक्षायाः माध्यमेन यूआईटी इत्यस्य षट्सु बीटेक-कार्यक्रमेषु प्रवेशः प्रदास्यते। प्रवेशपरीक्षायाः कृते १४०० तः अधिकाः अभ्यर्थिनः आवेदनं कृतवन्तः। अभ्यर्थिनां सौकर्याय शिमला, काङ्गडा, हमीरपुरं, मण्डी च इत्यादिषु विभिन्नस्थानेषु परीक्षाकेन्द्राणि स्थापितानि सन्ति। हिमाचल प्रदेश विश्वविद्यालयेन नालागढ़- परीक्षाकेन्द्रं शिमलाकेन्द्रे एव समाहितं कृतम्। नालागढ़केन्द्रस्य अभ्यर्थिनः इदानीं शिमलास्थितस्य 'डिपार्टमेंट ऑफ इवनिंग स्टडीज्' इत्यत्र परीक्षां दास्यन्ति।

# झारखण्डराज्यस्य रामगढजनपदे संस्कृतभारत्या आयोजितः सम्भाषणशिबिरप्रबोधनवर्गः









हिमसंस्कृतवार्ताः- आशुतोष पाण्डेयः, देवघरः। भारतवर्षस्य विविधराज्येषु सुवर्णमण्डिते झारखण्डराज्ये संस्कृतभारत्याः झारखण्डप्रान्तशाखा रामगढ-जनपदान्तर्गत- राधागोविन्द-सार्वजनिकविद्यालये संस्कृत-सम्भाषण- शिबिरप्रबोधनवर्गम् अकल्पयत्। अस्मिन् वर्गे झारखण्डस्य प्रायः दशजनपदेभ्यः समागताः त्रिंशदधिकशतछात्राः, प्रायः त्रिंशत् शिक्षकशिक्षिका-कार्यकर्तारश्च उत्साहपूर्वकं भागम् अगृह्णन्। अस्य वर्गस्य पञ्चमदिने एका विशाला रम्या शोभायात्रा निरगच्छत् यस्यां सर्वे छात्र छात्राः जयतु जयतु संस्कृतभाषा वदतु वदतु संस्कृतभाषा इति उच्चैः अघोषयन्। सुदीपः, पिन्टु पाण्डेयः, आशुतोषश्च मानवीयमानभाषा संस्कृतवाणी, शासनविकासभाषा संस्कृतवाणी, सर्वगणतन्त्रभाषा संस्कृतवाणी इति घोषम् अकुर्वन्। देवघरजनपद-नगरमन्त्री अंशुमान पाण्डेयः विश्वगुरुसाधनाय संस्कृतवाणी, ज्ञानराशिवर्धनाय संस्कृतवाणी, जनजनजीवनाय संस्कृतवाणी, लोकद्वेषभेदनाय संस्कृतवाणी, इत्यादिघोषवाक्यानां सानन्दं जयघोषम् अकरोत्। यात्रायाः मध्ये राञ्चीनगरस्य काश्चन छात्राः मार्गे गच्छत्सु जनेषु संस्कृतपठनाय आकर्षणं जनयितुं किञ्चन नाटकं प्रादर्शयन्। नगरस्य चतुष्पथे पौराः यात्रिकोपरि पुष्पवृष्टिम् अकुर्वन् तथा च स्थानीयजनाः श्रान्तेभ्यः यात्रिकेभ्यः जलपिष्टकशीतपेयादि-वस्तूनां वितरणम् अकुर्वन्। अस्मिन् पावनावसरे संस्कृतभारत्याः प्रान्तविद्यालयप्रमुखः डॉ सुनीलकुमार कश्यप, प्रान्तमन्त्री पृथ्वीराजसिंहः, शिक्षणप्रमुखः डॉ विनयकुमार पाण्डेयः डॉ रमेश कुमारः, डॉ नवीन मिश्रः, डॉ राम आचल यादवः, डॉ सन्दीपः मिश्र डॉ जगदम्बा प्रसादः डॉ पारङ्गतः खलखो गौरव दूवे उपस्थिताः आसन्। समस्तकार्याणां साक्षी सूत्रधारः संस्कृतभारत्युपाध्यक्षः डॉ. दीपचन्द्रामकश्यपहोदयस्य पर्यवेक्षणे सम्पूर्णसंस्कृतभारतीपरिवारं संयोज्य सर्वेभ्यः जनेभ्यः एकं सुसन्देशम् अयच्छत्। धन्यवादः जयतु संस्कृतं जयतु भारतमिति।

# परिवादनिवारणे न भविष्यति विलम्बः, दोषाधिकारिणां विरुद्धं त्वरितकार्याचरणं भविष्यति : नीतीशमिश्रः

हिमसंस्कृतवार्ता, राघवनाथझा। नगरविकास-आवासमन्त्री नीतीशमिश्रः विभागीयशिकायतानां निरीक्षणप्रकरणानाञ्च समीक्षां कुर्वन् अधिकारिणः प्रलम्बितकार्याणां शीघ्रनिष्पादनाय आदिष्टवान्। सः अवदत् यत् जनप्रतिनिधिभ्यः अधिकारिणां विरुद्धं प्राप्तानां परिवादानां प्राथमिकताधारेण समयबद्धनिवारणं सुनिश्चितं क्रियेत। मन्त्री स्पष्टीकृतवान् यत् शिकायतानां आरोपाणाञ्च अन्वेषणं "फास्ट ट्रैक मोड" (द्रुतगत्या) भविष्यति, ये च अधिकारिणः दोषायिष्यन्ते (दोषिणः प्राप्स्यन्ते), तेषां विरुद्धं नियमानुसारं त्वरितकार्याचरणं विधास्यते। सः अवदत् यत् विभागे भ्रष्टाचारं, प्रमादं (लापरवाही), अनियमितताञ्च प्रति 'शून्यसहनशीलता' (जीरो टॉलरेंस) इति नीतिः अनुसरिष्यते। श्रीमिश्रः परिवादानां निष्पादनाय प्रभावशालिन्याः मानकसंचालनप्रक्रियायाः (SOP) निर्माणाय निर्देशं दत्त्वा अवदत् यत् इयम् अन्वेषणप्रक्रिया निष्पक्षा, पारदर्शिनी, तथ्यप्रमाणसिद्धा च भवेत्।




अनेन सहैव, आधारहीनशिकायतैः निष्ठापूर्वकं कार्यं कुर्वताम् अधिकारिणां मनोबलं प्रभावितं न भवेत्, इत्यस्यापि ध्यानं धार्येत। सः प्रतिपादितवान् यत् सुशासनं, उत्तरदायित्वं, पारदर्शिताञ्च सुदृढीकर्तुं शिकायतानां त्वरितनिवारणम् आवश्यकम् अस्ति, विभागीयकार्यप्रणाल्यां च समयबद्धता संवेदनशीलता च सुनिश्चिता भवेत्।

# मिथिलाराज्यगठनस्य अभियाचना तीव्रा, सप्तत्रिंशत्तमे अन्तर्राष्ट्रिय-मैथिली-सम्मेलने नव प्रस्तावाः पारिताः





हिमसंस्कृतवार्ता, विश्व मोहन झा ,दरभंगा। खगड़ियानगरे स्थिते एस.बी. मेमोरियल विद्यालयस्य सभागारे आयोजितस्य सप्तत्रिंशत्तमस्य (३७) अन्तर्राष्ट्रिय-मैथिली-सम्मेलनस्य उद्घाटनं भव्यरूपेण दीपप्रज्वनेन "जय-जय भैरवी" इति मङ्गलगीतेन च सञ्जातम्। सम्मेलनेऽस्मिन् मिथिलाराज्यस्य पुनर्गठनं विहाय कुलम् नव (९) प्रमुखाः प्रस्तावाः सर्वसम्मत्या पारिताः अभवन्।मुख्यातिथिः अभियान्त्रिकप्रमुखः सुरेश्वरपोद्दारः अवदत् यत् मिथिलाराज्यस्य निर्माणमेव मिथिलायाः सर्वाङ्गीणविकासाय एकमात्रः मार्गः अस्ति। तेन प्रतिपादितं यत् ग्रियर्सन-महोदयेन निर्धारितः सम्पूर्णः मैथिलीभाषी प्रदेशः मिथिलाराज्ये अन्तर्भूतः भवेत्। सम्मेलने वक्तारः मैथिलीभाषायाः, संस्कृतेः, मिथिलाक्षरस्य च संरक्षणाय विस्ताराय च बलं दत्तवन्तः। नेपालशाखायाः प्रतिनिधिभिः अपि नेपालस्य मधेश-कोशीप्रदेशयोः मैथिल्यै राजभाषायाः पदं प्रदातुं माङ्गं पुनः पुरःस्थापितम्।पारितेषु प्रमुखेपु प्रस्तावेषु— पृथक् मिथिलाराज्यस्य गठनम्, बिहारराज्ये मैथिल्यै द्वितीयराजभाषायाः गौरवप्रदानम्, विद्यालयीयशिक्षायाः माध्यमं मैथिली भवेत्, मैथिल्यै शास्त्रीयभाषायाः मान्यता, उच्चशिक्षायाः अनुसन्धानसंस्थानस्य स्थापना, मिथिलासर्किटस्य विकासः, पुरातात्त्विकधरोहरसंरक्षणपरिषदः गठनं तथा च रेलयाननामपरिवर्तनम् इत्यादयः विषयाः मुख्याः आसन्। सम्मान्यसत्रे इदमपि निर्णीतम् यत् जनगणनावसरे मैथिलीं मातृभाषात्वेन लेखयितुं व्यापकं जनचेतना-अभियानं चालयिष्यते। तकनीकीसत्रे जनगणिता-शिक्षा-साहित्य-मिथिलाक्षर-संरक्षणादि-विषयेषु षोडश (१६) शोधपत्राणि प्रस्तुतानि। दिवसारभ्य प्रचलितानां सत्राणाम् अवसाने सायङ्काले भावकविगोष्ठ्याः आयोजनं सञ्जातम्, यस्यां द्वाविंशतिः (२२) कवयः स्वरचनाः पठितवन्तः।सम्मेलनस्य द्वितीये दिवसे सङ्गठनात्मकबैठके सर्वासाम् अनुषङ्गिकसंस्थानां वार्षिकप्रतिवेदनानि प्रस्तुतानि, आगामिकार्ययोजना च चर्चिता। मिथिला-उद्योग-शिक्षा-साहित्य-मिथिलाक्षरप्रचारेण सह सम्बद्धाः घटकाः संयुक्तं जागरूकताभियानं चालयितुं दृढसङ्कल्पं कृतवन्तः। कार्यक्रमस्य अन्ते आगामिनः अष्टत्रिंशत्तमस्य (३८) अन्तर्राष्ट्रिय-मैथिली-सम्मेलनस्य घोषणा कृता, यत् अस्मिन्नेव वर्षे १६-१७ नवम्बर २०२६ दिनाङ्के सुपौलमण्डले आयोजितं भविष्यति।

# जालन्धरस्य कलाकाराः परिवर्तयन्ति हमीरपुरस्य स्वरूपम्; निर्जीवाः भित्तयः चित्रकलया जाताः आकृष्टाः




हिमसंस्कृतवार्ताः -हमीरपुरम्। नगरनिगमस्य अन्तर्गतं याः भित्तयः (डंगो की दीवारें) पुरा निर्जीवाः उपेक्षिताः च आसन्, ताः अधुना सुन्दरेण कलाकर्मणा सर्वान् आकर्षयन्ति। जालन्धरतः आगतैः कलाकारैः भित्तिषु वर्णसंयोजनं कृत्व ईदृशी चित्रकला प्रकटीकृता, यां दृष्ट्वा प्रत्येकं जनः विस्मितः अस्ति। एतेषां कलाकाराणां प्रतिभां वीक्ष्य सर्वे तेषां भूरि प्रशंसां कुर्वन्ति। भित्तिषु न केवलं सुन्दराणां पुष्पाणां चित्राणि विरचितानि, अपितु वन्यजीवानां पशु-पक्षिणां च आकृतयः अपि उत्कीर्णाः सन्ति। अस्मिन् कार्ये यत्र यन्त्राणां साहाय्यं गृह्यते, तत्रैव हस्तकलायाः कौशलमपि अनुपमं वर्तते। सोमवासरे एते कलाकाराः भित्तिषु वर्णलेपनं कृत्वा चित्राणि सज्जीकुर्वन्तः संदृष्टाः। आरक्षक-स्थानकस्य (पुलिस थाना) यातायात-स्थलस्य च मध्ये स्थिताः याः भित्तयः पूर्वं कान्तिहीनाः आसन्, ताः अधुना सुन्दराभिः आकृतिभिः सह भाषन्ते इति प्रतीयते। अतः पूर्वम् एते कलाकाराः नगरनिगमस्य क्षेत्रान्तर्गते बहुषु स्थानेषु भित्तयः सुन्दराभिः आकृतिभिः अलङ्कृतवन्तः। एतेषां वर्णनिर्माणकला अपि अतीव श्लाघनीया अस्ति। विविधानां वर्णाणां मिश्रणं कृत्वा नूतनरङ्गस्य निर्माणे एते निष्णाताः सन्ति। गत-सुदीर्घकालात् एते नगरनिगमस्य क्षेत्रे कार्यं कुर्वन्तः सन्ति, एतेषां कार्येण च सर्वे नागरिकाः भृशं प्रसन्नाः दृश्यन्ते। सुन्दराणाम् आकृतीनाम् उत्कीर्णकाः जालन्धरस्य भोगपुरनिवासी सोनू-आर्टिस्ट, जालन्धरतः एव दड़ोच-मनीषः, आशुशर्मा, सतीशश्च अद्भुतायाः प्रतिभायाः धनिनः सन्ति। एते सर्वे मिलित्वा हमीरपुरस्य चित्रं (स्वरूपम्) परिवर्तयन्तः सन्ति।

# मशोबरा-क्षेत्रे उद्घाटितं प्रदेशस्य प्रथमं महिला-नशामुक्ति-केन्द्रम्; टाण्डा-चिकित्सालये प्रारप्स्यते द्वितीयं केन्द्रम्



**हिमसंस्कृतवार्ताः - शिमला।**
मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः शिमलायाः समीपे मशोबरा-क्षेत्रे 'नव-जीवन' इति नाम्ना महिला-नशामुक्ति-पुनर्वासकेन्द्रस्य विधिवत् उद्घाटनम् अकरोत्। अस्मिन् अवसरे सः अवदत् यत् हिमाचलप्रदेशे नशायाः (विशेषतः 'चिट्टा' इति मादकद्रव्यस्य) आह्वानानि केवलं विधि-व्यवस्थायाः विषयः नास्ति, अपितु एषः कश्चित् सामाजिकः, पारिवारिकः, मानवीयश्च सङ्कटः वर्तते। राज्यसर्वकारेण प्रारम्भकालादेव चिट्टा-इत्यस्य विभीषिकां गम्भीरतया स्वीकृतं तथा च एतस्य निषेधाय जनसामान्याः जागरूकतां प्रति प्रेरिताः क्रियन्ते। तेन संसूचितं यत् नशातस्कराणां विरुद्धं दृढा कार्यविधिः प्रचलति।मुख्यमन्त्रिणा प्रतिपादितं यत् एतत् राज्यस्य स्वप्रकारकं प्रथमं विशेषकेन्द्रं वर्तते, यत् पीडितमहिलानां केवलं चिकित्सकीयम् उपचारमेव न करिष्यति, अपितु ताभ्यः सम्मानजनकजीवनं प्रति प्रत्यागमनस्य नूतनम् अवसरमपि प्रदास्यति। अस्मिन् केन्द्रे पीडितमहिलाभ्यः सुरक्षितः आवासः, चिकित्सकीयोपचारः, मनोवैज्ञानिकपरामर्शः (काउंसलिंग), पुनर्वासः, परिवार-आधारित-सहयोगप्रणाली च उपलप्स्यन्ते। तेन उद्घोषितं यत् शासकीयक्षेत्रे द्वितीयं महिला-नशामुक्ति-पुनर्वासकेन्द्रं काङ्गड़ा-जनपदस्य 'डा. राजेन्द्र प्रसाद राजकीय चिकित्सा महाविद्यालय, टाण्डा' इत्यत्र आरप्स्यते।
मुख्यमन्त्रिणा कथितं यत् नशापाशे बद्धाः युनः महिलाः वा अपराधिनः न सन्ति, किन्तु नशाविक्रेता तस्करः समाजस्य परमशत्रुः अस्ति। सर्वकारः एतादृशानाम् अपराधिनां प्रति शिथिलतां न प्रदास्यति। सर्वकारस्य स्पष्टा नीतिः अस्ति- पीडितान् प्रति संवेदना तथा च तस्कराणां प्रति कठोरता। सुक्खू-महोदयेन प्रकथितं यत् यदा कापि पुत्री महिला वा नशायाः पाशे बद्धा भवति, तदा केवलं सा एका एव प्रभाविता न भवति, अपितु सम्पूर्णः परिवारः, तस्याः सन्ततयः, आगामिसन्ततीश्च प्रभाविताः भवन्ति। अनयैव धिया एकतः उपचार-परामर्श-पुनर्वास-सामाजिकव्यवस्थानां निर्माणं क्रियते, अपरतः च चिट्टातस्कराणां विरुद्धं राज्ये तीव्रा कार्यविधिः विधीयते। मुख्यमन्त्रिणा संसूचितं यत् सर्वकारेण शिमलातः गतवर्षस्य १५ नवम्बर दिनाङ्कात् 'एन्टी-चिट्टा जन आन्दोलनम्' प्रारब्धम् आसीत्, यत् अद्य एकस्य व्यापकस्य सामाजिक-अभियानस्य रूपं गृहीतवान् अस्ति। एषः केवलं सर्वकारीयः कार्यक्रमः नास्ति, अपितु युवभ्यः, पञ्चायतप्रतिनिधिभ्यः, शिक्षकेभ्यः, स्वयंसेवीसंस्थाभ्यः, आमनागरिकेभ्यश्च कश्चित् 'जनान्दोलनम्' संजातम्। तेन जनेभ्यः आह्वानं कृतं यत् ते चिट्टा-विरुद्धं सङ्घर्षे सक्रियतापूर्वकं भागं गृह्णीयुः येन समाजात् एषा कुरीतिः समूलोन्मूलिता भवेत्। सर्वकारः नशातस्कराणां विरुद्धं निर्णायकयुद्धं कृत्वा पीआईटी-एनडीपीएस (PIT-NDPS) सदृशानां कठोराणां प्रावधानानाम् अन्तर्गतं निरोधात्मिकां कार्यविधिः करोति। तस्कराणां सम्पत्तीनां संचिह्नीकरणं क्रियते तथा च नशाव्यापारे संलिप्तः कश्चपि जनः न रक्षितुं शक्ष्यते, सः कियान् अपि प्रभावशाली किमर्थं न भवेत्।

# प्रधानमन्त्रावासयोजनायाः (नगरीयायाः) द्वितीयचरणे गतिवर्धनम्, २६२.३७ कोटिरूप्यकाणां वित्तीयस्वीकृतिः




**हिमसंस्कृतवार्ता, राघवनाथझा।**
नगरविकास-आवासमन्त्री नीतीशमिश्रः न्यवेदयत् यत् प्रधानामन्त्रावासयोजनायाः (नगरीयायाः) द्वितीयचरणान्तर्गतं राज्यस्य द्विशतसंख्याकेभ्यः (२००) लाभार्थी-आधारित-निर्माणप्रकल्पेभ्यः द्वितीयकिस्तरूपेण २६२.३७ कोटिरूप्यकाणां व्ययार्थं स्वीकृतिः प्रदत्ता अस्ति। अनेन योग्यलाभार्थिनाम् आवासनिर्माणकार्ये तीव्रगत्या कार्यसम्पादनाय साहाय्यं मिलिष्यति।
मन्त्री उक्तवान् यत् प्रधानमन्त्रि-नरेन्द्रमोदी-मुख्यमन्त्रि-सम्राट्-चौधरी-महोदयानां कुशलनेतृत्वे राज्यसर्वकारः नगरीयनिर्धनेभ्यः सुदृढं सम्मानजनकञ्च आवासं प्रदातुं पूर्णतः कटिबद्धः वर्तते। सः अवदत् यत् 'सर्वेभ्यः आवासः' इति महल्लक्ष्यं पूरयितुं बिहारराज्यं निरन्तरं पुरोगतिं करोति। तेन विज्ञापितं यत् २०२४ तमवर्षस्य सितम्बरमासस्य प्रथमे दिनाङ्के आरब्धायाः अस्याः प्रधानमन्त्रावासयोजनायाः (नगरीयायाः) द्वितीयचरणस्य 'लाभार्थी-आधारित-निर्माण' (बीएलसी) इति घटकस्य अन्तर्गतं पात्रपरिवारेभ्यः स्वकीयायां भूमौ सुदृढगृहनिर्माणाय वित्तीयसाहाय्यं प्रदीयते। अस्याः योजनायाः अन्तर्गतं निर्मितानि गृहाणि राष्ट्रीयभवनसंहितायाः (एनबीसी) स्थापित-मानकानुकूलानि भविष्यन्ति। श्रीमिश्रः प्रतिपादितवान् यत् आवासनिर्माणस्य गुणवत्तां, पारदर्शितां, समयबद्धताञ्च सुनिश्चितं विधातुं विभागः विस्तृतदिशानिर्देशान् सज्जीकरोति। प्रत्येकस्मिन् आवासे न्यूनतमातिन्यूनं प्रकोष्ठद्वयं, पाकशाला, शौचालयः, स्नानगृहञ्च सुनिश्चितानि भवेयुः, येन लाभार्थीपरिवारेभ्यः श्रेष्ठतराः जीवनसुविधाः सुलभतया प्राप्येरन्।

## अद्य प्रभृति प्रधानमन्त्री-सुरक्षित मातृत्व-अभियानस्य राष्ट्रव्यापिनः कार्यक्रमाः आयोज्यन्ते

अद्य प्रभृति प्रधानमन्त्री-सुरक्षित मातृत्व-अभियानस्य दशवर्षपूर्त्य उपलक्ष्ये राष्ट्रव्यापिनः कार्यक्रमाः आयोज्यन्ते। एषः अभियानः 9 जून 2016 तमे वर्षे प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रारब्धः ।

# बिहार-वार्ताः , अद्यतनानि मुख्याणि वृत्तपत्राणि

**हिमसंस्कृतवार्ता, राघवनाथझा।**

## दीघाक्षेत्रे युवकस्य संशयास्पदनिधनेन कोलाहलः

पाटलीपुत्रस्य दीघाक्षेत्रे कस्यचित् युवकस्य संशयास्पदनिधनानन्तरं परिवारजनैः प्रहारं कृत्वा हत्यायाः आरोपः प्रस्थापितः। आक्रोशितैः जनैः 'पॉल्सन' इति मार्गं निरुध्य प्रदर्शनं कृतम्, येन यातायातव्यवस्था प्रभाविता अभवत्। आरक्षकाणाम् उपरि आरोपो वर्तते यत् तैः अपराधी विमुक्तः। क्षेत्रे वर्तमानां शिथिलतां वीक्ष्य अतिरिक्तम् आरक्षकबलं नियोजितम्।

## अनन्तसिंहाय गुञ्जनसिंहाय च परित्राणम्

न्यायालयः विधानसभासदस्यस्य अनन्तसिंहस्य तथा च भोजपुरी-गायकस्य गुञ्जनसिंहस्य बन्दीकरणे आगामिश्रवणं यावत् प्रतिबन्धं निरन्तरं कृतवान्।

## आनन्दमोहनस्य गुरुतरः आरोपः

आनन्दमोहनः दावं कृतवान् यत् पूर्वमुख्यमन्त्रिणं नीतीशकुमारमहोदयं "अस्त्रभयेन त्यागपत्रं दापितवन्तः"। सः केषाञ्चित् नेतृणाम् उपरि एनडीए-गठबंधनं दुर्बलीकर्तुं आरोपम् अपि अकरोत्।

## विधानसभां प्राप्तवान् सुनीलसिंहः

सुनीलसिंहः विधानपरिषदो निर्वाचनाय अभ्यर्थिकरणे दलनेतृत्वं प्रति कृतज्ञतां ज्ञापितवान्, उक्तवान् च यत् तेन द्वितीयवारम् अयं सुअवसरः प्राप्तः।

## अद्य भविष्यति सम्राट्-मन्त्रिमण्डलस्य उपवेशनम्

मुख्यमन्त्रिणः सम्राट्-चौधरी-महोदयस्य अध्यक्षतायां सायङ्काले पञ्चवादने मुख्यमन्त्रि-सचिवालये मन्त्रिमण्डलस्य उपवेशनं विधास्यते। अनेकेषु महत्वपूर्णेषु प्रस्तावेषु निर्णयस्य सम्भावना वर्तते।

## एमएलसी-निर्वाचनम्: नामाङ्कनस्य अन्तिमः दिवसः

विधानपरिषदः निर्वाचनाय नामाङ्कनपत्रसमर्पणस्य अद्य अन्तिमः दिवसः अस्ति। मन्त्री श्रवणकुमारः विज्ञापितवान् यत् एनडीए-पक्षस्य नव अभ्यर्थिनः अद्य नामाङ्कनं करिष्यन्ति। अस्मिन् अवसरे मुख्मन्त्रि-उपमुख्यमन्त्रि-सहयोगिदलनां वरिष्ठनेतारश्च उपस्थिताः भविष्यन्ति।

## जहानाबादक्षेत्रे कस्यचित् कर्माधिकारिणः उपरि गुलिकाप्रहारः

जहानाबादक्षेत्रे अपराधिनः कर्माधिकारिणं मुन्नासिंहं गुलिकया प्रहृतवन्तः। गम्भीरायाम् अवस्थायां सः 'पीएमसीएच' इति चिकित्सालयं प्रति प्रेषितः। अस्याः घटनायाः पृष्ठतः पुरातनविवादस्य आशङ्का क्रियते।राजनीतिकहलगतिः, मन्त्रिमण्डलस्य उपवेशनं, विधानपरिषदः निर्वाचनं, शान्ति-व्यवस्थासम्बद्धाः घटनाश्च अद्य बिहारराज्यस्य मुख्यवार्तासु सन्ति।

# कथा रङ्गमञ्चश्च' इति विषयक-पञ्चदिवसीय-नाट्यकार्यशालायाः शुभारम्भः




**हिमसंस्कृतवार्ता, विश्व मोहन झा , दरभंगा।** ललितनारायणमिथिलाविश्वविद्यालयस्य ललितकला-सङ्कायान्तर्गत-विश्वविद्यालय-सङ्गीत-नाट्यविभागेन आयोजितायाः 'कथा रङ्गमञ्चश्च' इति विषयक-पञ्चदिवसीयायाः रङ्गमञ्चकार्यशालायाः सोमवासरे विधिवत् शुभारम्भः अभवत्। इयं कार्यशाला जूनमासस्य अष्टमदिनाङ्कात् द्वादशदिनाङ्कं यावत् आयोजयिष्यते। विभागाध्यक्षा संयोजिका च प्रो. लावण्यकीर्तिसिंह-'काव्या'-महोदया अवदत् यत् रङ्गमञ्चः केवलं मनोरञ्जनस्य माध्यमं नास्ति, अपितु समाजस्य, संस्कृतेः, मानवीयसंवेदनानाञ्च अभिव्यक्तेः सशक्तं साधनं वर्तते। सा अकथयत् यत् कथा-रङ्गमञ्चयोः गभीरः सम्बन्धः अस्ति, एतादृश्यः कार्यशालाश्च छात्राणां रचनात्मकक्षमतायाः व्यक्तित्वविकासस्य च कृते प्रमुखां भूमिकां निर्वहन्ति। मुख्यप्रशिक्षकः 'भिखारीठाकुरयुवासम्मानेन' सम्मानितः रङ्गकर्मी कुन्दनकुमारमहोदस्य प्रतिपादितवान् यत् कांश्चित् कथाम् रङ्गमञ्चे प्रभावशालिरूपेण प्रस्तोतुं कल्पनाशक्तिः, अभिनयचातुर्यम्, संवादाभिव्यक्तिः, मञ्चीयमर्यादा च अत्यावश्यकाः सन्ति। सः प्रतिभागिभ्यः अभिनयस्य, शारीरिकशारीरिक-अभिव्यक्तेः, स्वरसाधनायाः, संवादप्रस्तुतेः, चरित्रनिर्माणस्य च तकनीकीनां ज्ञानं दत्तवान्। अस्यां कार्यशालायां प्रतिभागिनः समूह-अभ्यासेन, अभिनयोपयोगैः, तात्कालिकप्रस्तुत्या, संवादाभिनयेन च रङ्गमञ्चस्य व्यावहारिकपक्षान् शिक्षितवन्तः। अनेन सहैव कथायाः नाट्यरूपान्तरणम्, पटकथानिर्माणम्, मञ्चसज्जा, प्रकाशव्यवस्था, ध्वनिप्रभावः तथा च प्रस्तुतिकला-विषयेषु अपि प्रशिक्षणं प्रदत्तम्। प्रतिभागिनः इमां कार्यशालां प्रेरणादायिकां ज्ञानवर्धिकाञ्च कथितवन्तः। प्रो. लावण्यकीर्तिसिंहमहोदया न्यवेदयत् यत् आगामिसत्रेषु अभिनय-निर्देशन-मञ्चप्रबन्धन-नाट्यलेखन-प्रस्तुतिकलासु विशेषप्रशिक्षणं विधास्यते। कार्यक्रमस्य समापनं धन्यवादज्ञापनेन सह अभवत्।

# "लौकिकन्यायकोशः"

# "अङ्गारन्यायः"

अङ्गारःउष्णः यदा भवति तदा हस्ते गृहीतः चेत् हस्तं दहति स एव यदा शीतलः भवति तदा स्पृष्टः चेत् हस्तं मलिनं करोति। एवं कस्याम् अपि दशायां तस्य स्पर्शः दोषजनकः एव। तथैव दुर्जनस्य संगतिः अपि हानिम् एव करोति इति द्योतयितुम् अस्य न्यायस्य प्रयोगः भवति।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे/ महाराष्ट्रम्**

# वार्तासंवादः



**हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः**

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य मया एका विशिष्टा वार्ता पठिता। कश्चित् भारतीयः यन्त्रज्ञः तान्त्रिक- शिक्षण-संस्थायाः परीक्षायाम् अनुत्तीर्णः जातः, किन्तु पश्चात् तेन गूगल-गवेषण-संस्थायाम् महत् साफल्यं प्राप्तम्। तेन न्यूयॉर्कनगरस्य टैम्सचत्वरे महाफलके विज्ञापनं प्रदर्श्य स्वकीया अविवाहित- माता विस्मिता कृता।

**नन्दिनी-** सत्यम्, मातुः सन्तोषाय एतादृशं कार्यं सर्वैः श्लाघितम्। एषः पुत्रधर्मः सम्यक् पालितः। अधुना अन्या वार्ता। बेङ्गलूरु-नगरे कश्चित् परिवारः मास-मात्रे गृह-भाटकाय, व्यायामशालायै, शिशु- रक्षिकायै च षट्षष्टिसहस्राधिकैकलक्ष-रूप्यकाणि व्ययीकृतवान् अस्ति। एतादृशं व्ययं दृष्ट्वा अन्तर्जाललोकेन विविधाः प्रतिक्रियाः दत्ताः।

**काव्या-** आम्, महानगरेषु एतावान् व्ययः सामान्यः जातः, किन्तु सामान्यानां कृते एतदसाधारणम् एव। एतद्दृष्ट्वा मया अन्या वार्ता अपि पठिता। ऋषिकेशे कश्चित् जनः समुचितं सुरक्षा-नियमं विना पर्वतात् अधः पतितवान् अस्ति। तस्य साहसिक- क्रीडायाः चलच्चित्रं दृष्ट्वा जनाः सुरक्षाविषये चिन्तिताः जाताः।

**नन्दिनी-** सत्यम्, क्रीडासु सुरक्षा-नियमाः खलु अनिवार्याः, अन्यथा प्राण-हानिः सम्भवेत्। परन्तु एतस्मात् अपि विस्मयकारिणी इयं स्वास्थ्य-वार्ता अस्ति। अशीति-वर्षीया एका वृद्धा तीव्र-स्मृतिभ्रंशरोगेण पीडिता अभूत्। तया पञ्चग्रामपरिमितं दिव्यकवकं खादितम्। ततः परं सा पुनः भाषितुम् आरब्धवती अस्ति! एषः कश्चन चमत्कारः एव औषधक्षेत्रे जातः।

**काव्या-** सत्यम्, एतद्विस्मयकारकम् अस्ति। प्रकृतेः औषधानां च शक्तिः अचिन्त्या। तया वृद्धया पुनः वाक् प्राप्ता इति श्रुत्वा मम मनसि महान् हर्षः जातः।

# पूर्व-सी.पी.एस. नीरजभारतेः

# आरोपाणां परं काङ्ग्रेसदले कलहः

## अनुशासनसमित्याः उपवेशनं मङ्गलवासरे

**हिमसंस्कृतवार्ताः - शिमला।** पूर्व-मुख्यसंसदीयसचिवस्य (सीपीएस) नीरजभारतेः आरोपाणां परं काङ्ग्रेसदले तीव्रः कलहः (घमासान) प्रचलति। प्रदेशकाङ्ग्रेससमित्याः अनुशासनसमित्याः उपवेशनं ९ जून दिनाङ्के शिमलायाम् आयोजयिष्यते। अस्मिन् उपवेशने नीरजभारतेः प्रकरणे कार्यविधेः उपरि निर्णयस्य सम्भावना वर्तते। प्रदेशकाङ्ग्रेससङ्गठनमहामन्त्री विनोदजिन्टा महोदयः सोमवासरे शिमलायां संवाददातृसम्मेलने प्रदेशकाङ्ग्रेसाध्यक्षस्य विनयकुमारस्य निर्देशान् उद्धृत्य अवदत् यत् दले अनुशासनहीनता वरिष्ठाणां नेतृणां च विरुद्धं सार्वजनिकरूपेण असद्रूपेण भाषणं कदापि न सहिष्यते। तेन कथितं यत् दलस्य संविधाने विहितानां नियमानाम् अन्तर्गतं एतादृशप्रकरणेषु कठोरा कार्यविधिः विधास्यते। जिन्टा महोदयः प्रकथितवान् यत् गतदिनेभ्यः एकेन पूर्वपदाधिकारिणा मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खू-महोदयस्य काङ्ग्रेस-केन्द्रीयनेतृत्वस्य च उपरि आरोपिताः आरोपाः सर्वथा आधारहीनाः, मिथ्या, तथ्यातीताश्च सन्ति। सः एतत् मुख्यमन्त्रिणः छविं धूमिलं कर्तुं प्रदेशसर्वकारं च अपवादितुं कश्चित् षड्यन्त्रम् इति न्यरूपयत्। जिन्टा अवदत् यत् काङ्ग्रेसथले एकम् अनुशासितं दलम् अस्ति, यदि कस्यापि पदाधिकारिणः कार्यकर्तुः वा कापि असन्तुष्टिः (शिकायत) अस्ति तर्हि सा दलस्य उचिते मञ्चे एव उत्थापनीया आसीत्। तेन पूर्वोपाध्यक्षस्य नीरजभारतेः उल्लेखं कुर्वता प्रकथितं यत् यदि तस्य कापि समस्या आसीत् तर्हि सा सङ्गठनस्य सम्मुखं प्रस्थापनीया आसीत्। तेन संसूचितं यत् प्रदेशकाङ्ग्रेससमित्याः अनुशासनसमित्याः उपवेशनं ९ जून दिनाङ्के मध्याह्ने द्विवाद्रे 'राजीव भवन' इत्यत्र प्रचलिष्यति, यत्र अस्मिन् प्रकरणे साकं दलस्य अनुशासनसम्बद्धेषु अन्यविषयेषु विमर्शाः भूत्वा आगामिकार्यविधेः निर्णयः गृहीष्यते। प्रदेशकाङ्ग्रेसमहामन्त्री (फ्रंटल सङ्गठनम्) हरीकृष्णहिमरालः अवदत् यत् मतचौर्यं प्रलोभनस्य राजनीतिश्च भारतीयजनतादलस्य (भाजपा) विशेषता वर्तते। भाजपा-नेतारः काङ्ग्रेसजनान् अपि प्रलोभयितुं यतन्ते, काङ्ग्रेसजनैः एतेभ्यः जनेभ्यः दूरं स्थातव्यम्। अस्मिन् अवसरे प्रदेशकाङ्ग्रेस-उपाध्यक्षौ अमितनन्दा, यशपालतनैइक च उपस्थितौ आस्ताम्। काङ्ग्रेसमहामन्त्रिणा विनोदजिन्टा महोदयेन प्रकथितं यत् काङ्गड़ा-जनपदस्य काङ्ग्रेसाध्यक्षेण अनुरागशर्मणा नीरजभारती ब्लॉक-सदस्यतायाः ६ वर्षाणां कृते निष्कासितः अस्ति, यतोहि एतत् तस्य क्षेत्राधिकारे अन्तर्भवति। प्रदेशकाङ्ग्रेस-अध्यक्षः दलस्य अनुशासनसमित्याः परामर्शानुसारं अग्रे कार्यं विधास्यति।

# काङ्ग्रेसदले अनुशासनहीनता केनापि प्रकारेण न सहिष्यते - अनुरागशर्मा

सोमवासरे बैजनाथ-क्षेत्रे राज्यसभासांसदः अनुरागशर्मा स्थानीयविधायकः किशोरीलालश्च संयुक्तप्रेसवार्तां कृत्वा नीरजभारतेः वचनानि आधारहीनानि गैर-सांविधानिकानि च इति अवोचताम्। तौ अवदताम् यत् काङ्ग्रेसदले एतादृशी अनुशासनहीनता केनापि प्रकारेण स्वीकार्या नास्ति। राज्यसभासांसदेन अनुरागशर्मणा प्रतिपादितं यत् नीरजभारती दलेन पूर्वं महता आदरेण सी.पी.एस. सदृशे उच्चपदे प्रतिष्ठितः कृतः आसीत्। तेन कथितं यत् सुखविन्दरसिंहसुक्खू-महोदयः केन्द्रीयनेतृत्वेन तस्य निष्कलङ्कछविहेतुना प्रदेशस्य मुख्यमन्त्री कृतः। यदि नीरजभारतेः कापि समस्या आसीत् तर्हि तेन दलस्य मञ्चे वा देहल्यां (दिल्ली) केन्द्रीयनेतृत्वस्य सम्मुखं स्ववार्ता उपस्थापनीया आसीत्, न तु सार्वजनिकरूपेण एतादृशी अशोभनीया टिप्पणी करणीया आसीत्। तेन संसूचितं यत् सद्यः एव काङ्गड़ा-क्षेत्रे आयोजितायां सङ्गठनात्मक-उपवेशने राहुलगान्धिना अपि अनुशासनं प्राथम्येन स्वीकर्तुं दृढः सन्देशः दत्तः आसीत्। बैजनाथस्य विधायकेन किशोरीलालेन भणितं यत् नीरजभारतिना सामाजिकमाध्यमेषु (सोशल मीडिया) यद् वक्तव्यं क्रियते, तस्मात् स्पष्टं प्रतीयते यत् सः स्वकीयं मानसिकसन्तुलनं विस्मृतवान् (खो बैठे हैं)। नीरजः प्रायः अनर्गलं वदति, येन कारणेन तस्य उपरि पूर्वं बहवः अभियोगाः (मुकदमे) अपि पञ्जीकृताः सन्ति। विधायकेन प्रबोधयता कथितं यत् दलस्य प्रतिष्ठां भञ्जिकायाः एतादृशैः वक्तव्यैः सः सद्यः विरमेत्। अस्मिन् प्रसङ्गे ब्लॉक-काङ्ग्रेस-अध्यक्षः शशिराणा, विकासराणा, महिन्द्रसिंहः अन्ये च दलप्रमुखाः उपस्थिताः आसन्।

# एच.आर.टी.सी. - उपाध्यक्षः अजयः अवदत्- चण्डीगढे कारयिष्यामि 'डोप टेस्ट' इति

एच.आर.टी.सी. निगमस्य उपाध्यक्षः अजयवर्मा बुधवासरे चण्डीगढस्य कस्यापि सर्वकारमान्यताप्राप्तायाम् प्रयोगशालायां (लैब) स्वकीयम् 'डोप टेस्ट' (मादकद्रव्यपरीक्षणं) कारयितुं गच्छन् अस्ति। सोमवासरे प्रसृते एकस्मिन् प्रेस-वक्तव्ये अजयवर्मणा नीरजभारतेः आह्वानेन साकं कथितं यत् सः यस्याः प्रयोगशालायाः नाम वदिष्यति, तत्रैव परीक्षणं भविष्यति, किन्तु सा प्रयोगशाला सर्वकारमान्यताप्राप्ता भवेत्।